শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ ত্রযোৱিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ত্রযোৱিংশঃ সর্গঃ ॥

## শ্রীরামেণ লক্ষ্মণং প্রতি ৱিনাশসূচকানাং লক্ষণানাং ৱর্ণনং লঙ্কাং প্রত্যাক্রমণং চ

নিমিত্তানি নিমিত্তজ্ঞো দৃষ্টৱা লক্ষ্মণপূর্ৱজঃ।
সৌমিত্রিং সম্পরিষ্ৱজ্য ইদং ৱচনমব্রৱীৎ॥ **6.23.1** ॥

পরিগৃহ্যোদকং শীতং ৱনানি ফলৱন্তি চ।
বলৌঘং সংৱিভজ্যেমং ৱ্যূহ্য তিষ্ঠেম লক্ষ্মণ॥ **6.23.2** ॥

লোকক্ষযকরং ভীমং ভযং পশ্যাম্যুপস্থিতম্।
প্রবর্হণং প্রৱীরাণামৃক্ষৱানররক্ষসাম্॥ **6.23.3** ॥

ৱাতাশ্চ কলুষা ৱান্তি কম্পতে চ ৱসুন্ধরা।
পর্ৱতাগ্রাণি ৱেপন্তে পতন্তি চ মহীরুহাঃ॥ **6.23.4** ॥

মেঘাঃ ক্রৱ্যাদসঙ্কাশাঃ পরুষাঃ পরুষস্ৱনাঃ।
ক্রূরাঃ ক্রূরং প্রৱর্ষন্তি মিশ্রং শোণিতবিন্দুভিঃ॥ **6.23.5** ॥

রক্তচন্দনসঙ্কাশা সন্ধ্যা পরমদারুণা।
জ্ৱলতঃ প্রপতত্যেতদাদিত্যাদগ্নিমণ্ডলম্॥ **6.23.6** ॥

দীনা দীনস্ৱরাঃ ক্রূরাঃ সর্ৱতো মৃগপক্ষিণঃ।
প্রত্যাদিত্যং ৱিনর্দন্তি জনযন্তো মহদ্ভযম্॥ **6.23.7** ॥

রজন্যামপ্রকাশস্তু সন্তাপযতি চন্দ্রমাঃ।
কৃষ্ণরক্তাংশুপর্যন্তো লোকক্ষয ইৱোদিতঃ॥ **6.23.8** ॥

হ্রস্বো রূক্ষোঽপ্রশস্তশ্চ পরিৱেষস্তু লোহিতঃ।
আদিত্যে ৱিমলে নীলং লক্ষ্ম লক্ষ্মণ দৃশ্যতে॥ **6.23.9** ॥

রজসা মহতা চাপি নক্ষত্রাণি হতানি চ।
যুগান্তমিৱ লোকানাং পশ্য শংসন্তি লক্ষ্মণ॥ **6.23.10** ॥

কাকাঃ শ্যেনাস্তথা নীচা গৃধ্রাঃ পরিপতন্তি চ।
শিৱাশ্চাপ্যশুভান্ নাদান্ নদন্তি সুমহাভযান্॥ **6.23.11** ॥

শৈলৈঃ শূলৈশ্চ খড্গৈশ্চ ৱিমুক্তৈঃ কপিরাক্ষসৈঃ।
ভৱিষ্যত্যাৱৃতা ভূমির্মাংসশোণিতকর্দমা॥ **6.23.12** ॥

ক্ষিপ্রমদ্যৈৱ দুর্ধর্ষাং পুরীং রাৱণপালিতাম্।
অভিযাম জৱেনৈৱ সর্ৱৈর্হরিভিরাৱৃতাঃ॥ **6.23.13** ॥

ইত্যেৱমুক্ত্বা ধন্ৱী স রামঃ সঙ্গ্রামধর্ষণঃ।
প্রতস্থে পুরতো রামো লঙ্কামভিমুখো ৱিভুঃ॥ **6.23.14** ॥

সৱিভীষণসুগ্রীৱাঃ সর্ৱে তে ৱানরর্ষভাঃ।
প্রতস্থিরে ৱিনর্দন্তো ধৃতানাং দ্বিষতাং ৱধে॥ **6.23.15** ॥

রাঘৱস্য প্রিযার্থং তু সুতরাং ৱীর্যশালিনাম্।
হরীণাং কর্মচেষ্টাভিস্তুতোষ রঘুনন্দনঃ॥ **6.23.16** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে ত্রযোৱিংশঃ সর্গঃ ॥